| | |
|---|---|
| JAIN COLLEGE V V Puram<br>2nd PUC MOCK Paper – Jan. 2024 | **Course:** 2nd year PUC<br>**Subject:** Sanskrit<br>**Max. Marks:** 80<br>**Duration:** 3:15 hour |

## Part - A

**I. अधोनिर्दिष्टानां प्रश्नानां उत्तराणि कोष्ठकात् उद्धृत्य लिखत ।** 5×1=5

1. मर्त्यानां कर्मभूमिः का ?

   ( अमेरिका, भारतम्, कर्णाटक )

2. विक्रमादित्यकथां का कथयति ?

   ( मालविका, पुत्थलिका, प्रहेलिका )

3. के निर्विमर्शाः ?

   ( प्रव्राजकः, वणिजः, भीरवः )

4. शारद्वतः कः ?

   ( कण्वशिष्यः, कणादशिष्यः, कर्णशिष्यः )

5. बालिकायाः हस्तात् रोटिकाम् आकृष्य कः अधावत् ?

   ( घोरवानरः, तीक्ष्णदंष्ट्रः, अरण्यमार्जारः )

**II. मञ्जूषातः सूक्त पदं चित्वा रिक्तस्थानं पूरयत ।** 4×1=4

6. इतः स्वर्गश्च __________ मध्यश्चान्ताश्च गम्यते ।
7. उपरि न्यस्तदीपायां __________ क्षिप्यतां त्वया ।
8. सर्वः सगन्धेषु ___________ ।
9. भगवतः अशेषत्रिभुवनसुन्तरं _________ आसीत् ।

| सर्वावयवसुन्दरी, गङ्गायाम्, मोक्षश्च, विश्वसिति |
|---|

**III. 10. संयोजयत ।** 4×1=4

| अ | आ |
|---|---|
| ऊर्ध्वस्थदीपिका | पापम् |
| शार्ङ्गरवः | मञ्जूषा |
| अक्बर् बादशाह | वृक्षः |
| किल्बिषम् | कण्वशिष्यः |
| पुष्पितः | दिल्लीश्वरः |

**IV. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।** **5×1=5**

11. महाश्वेतायाः पिता कः ?
12. सुन्दरः किमर्थं नगरं आगच्छति ?
13. कर्णस्य गुरुः कः ?
14. सस्त्रिया किं रक्ष्यते ?
15. केन्द्रसाहित्य अकादमी प्रशस्तिद्वारा पुरस्कृता कृतिः का ?

**V. रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।** **2×1=2**

16. परदुःखेन <u>साधवो</u>ऽत्यन्तदुःखिनः भवन्ति ।
17. कन्या <u>मञ्जूषायां</u> प्रवेशिता ?

## <u>Part - B</u>

**VI. द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया, आङ्ग्लभाषया उत्तरं लिखत । (चतुर्णामेव)** **4×2=8**

18. पुराणभारते उल्लिखितानि तीर्थक्षेत्राणि कानि ?
19. नगरवासिभिः जनैः राक्षसः किम् उक्तः ?
20. राजपुत्रः मञ्जूषां प्राप्य किं करोति ?
21. बिल्लाः राणाप्रतापं कथं साहाय्यम् अकुर्वन् ?
21. प्रमाणावसरे महाश्वेता कीदृशी आसीत् ?
22. शान्त्याः सौन्दर्यं वर्णयत ।
23. कोषः किमर्थं संरक्ष्य ?

**VII. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । (चतुर्णामेव)** **4×2=8**

24. यो दुःखी सः सुहृदि दुःखं निवेद्य सुखी भवति ।
25. भवतु, अनिर्वर्णनीयं परकलत्रम् ।
26. मम जीवनं सार्थकं भवेत् ।
27. किं मां अन्यथा सम्भावयसि?
28. अहो गुरुकुलवैभवम् ।
29. सः यत्रकुत्रापि भवतु कालेज् आनेतव्य एव ।

## <u>Part – C</u>

**VIII. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषाया / आङ्ग्लभाषया वा लिखत । (चतुर्णामेव)** **2×3=6**

30. ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम् ।
    अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥

31. प्रविष्टो जातु भिक्षार्थमेकस्य वणिजो गृहे ।
    स ददर्श शुभां कन्यां भिक्षामादाय निर्गताम् ॥

32. विषयामिषलोभेन मनः प्रेरयतीन्द्रियम् ।

तन्निरुध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः ॥

33. कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।

तमस्तपति धर्मांशौ कथमाविर्भविष्यति ॥

**IX. दशवाक्यैः संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (चतुर्णामेव)** **4×5=20**

34. पुराणेषु भारतं कथं वर्णितम् ?

35. विक्रमादित्यस्य परोपकारगुणं वर्णयत ।

36. रोटिकाप्रसङ्गः ।

37. कर्णपरशुरामयोः संवादः ।

38. दुष्यन्तस्य पात्रचित्रणं कुरुत ।

39. पुण्डरीक महाश्वेतयोः सरससंवादः ।

40. विद्यार्थिनां कृते कृष्णशास्त्रीणां सन्देशः ।

## Part – D

**X. यथा निर्देशं लिखत । (त्रयाणामेव)** **3×3=9**

41. **सन्धिं विभजत / सन्धिं योजयत । (त्रयाणामेव)**

( नैतत्, यावन्नियोगम्, भृत्यैः + आनाय्य, पशवो + अपि, खल्वन्यत्र )

**42. विग्रहवाक्यं लिखत / समस्तपदं लिखत । (त्रयाणामेव)**

( कामधेन्वोः गुणाः, चिन्तनपद्धतिः, मनुजः पशुः इव, मुनिकुमारकम्, फलागमैः )

**43. पदपरिचयम् कुरुत । (त्रयाणामेव)**

( स्मृतम्, प्राप्तवान्, सम्पाद्य, भवितुम्, परिहृत्य )

**44. प्रयोगं परिवर्तयत ।**

**अ.** मया सा दृश्यते ।

**अथवा**

**आ.** विक्रमादित्यः कालं नयति ।

**45. अलङ्कारं सलक्षणं निर्दिशत ।**

**अ.** रतेः बाष्पबिन्दुभिः आचरितमेव स्फटिकाक्षमालिकाम् ।

**अथवा**

**आ.** त्वम् असत्यवादीव प्रतिभासि ।

**XI. 46. संस्कृतभाषया अनुवदत ।** **5×1=5**

ವಾರಣಾಸಿಯು ಗಂಗಾನದಿಯ ದಡದಲ್ಲಿದೆ. ಅದು ದೇವಾಲಯ ರೇಷ್ಮೆವಸ್ತ್ರ ಮತ್ತು ಘಟ್ಟಗಳಿಗಾಗಿ ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇದು ಭಾರತದ ಪ್ರಾಚೀನ ನಗರಗಳಲ್ಲೊಂದು. ಇದು ಭಾರತದ ಪ್ರಸಿದ್ಧ ಯಾತ್ರಾ ಸ್ಥಳ. ದೇಶದ ಎಲ್ಲಾ ಭಾಗಗಳಿಂದ ಜನರು ಇಲ್ಲಿಗೆ ಬರುವರು. ಅವರು ಗಂಗಾನದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡಿ ವಿಶ್ವನಾಥನ ದರ್ಶನ ಪಡೆದು ತಮ್ಮ ಜನ್ಮ ಸಾರ್ಥಕವಾಯಿತೆಂದು ಭಾವಿಸುವರು.

Banaras is on the banks of the river Ganga. It is famous for its temple, silk and Ghats. It is one of the most ancient cities. It is a famous pilgrim centre in India. People from all parts of the country visit this place. They take bath in the river Ganga, having visited the Vishvanatha temple. They feel that their life is fulfilled.

**XII. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **4×1=4**

पुरा देवशर्मा नाम विद्वान् आसीत् । तस्य पुत्रः मल्लिनाथः । बाल्यादपि तस्य पठने आसक्तिः न आसीत् । सः यदा युवकः भवति तस्य विवाहः समभूत् । श्वशुरगृहगमनानन्तरं विद्यावन्तः तस्य श्यालाः तम् उपहसितवन्तः । तदा सः स्वदोषं ज्ञात्वा काशीं गत्वा गुरोः सकाशे विद्याभ्यासम् अकरोत् । एष एव कालिदासादि प्रसिद्धानां कवीनां ग्रन्थानां व्याख्यानकर्ता । अद्यापि विद्वांसः मल्लिनाथं बहु आदरेण पश्यति ।

i. देवशर्मणः पुत्रः कः ?

ii. कदा मल्लिनाथस्य विवाहः समभूत् ?

iii. मल्लिनाथः कुत्र गत्वा विद्याभ्यासम् अकरोत् ?

iv. मल्लिनाथः केषां ग्रन्थानां व्याख्यानं रचयति ?

**********